10697

No. १०६९ · घ

Title भागवते गोपीगीतम्

Author

Extent २ Age १८२६

Subject पुराणम् · सम्पूर्णम्

नं० १०८-ई-घ

भागवते गोपीगीतम् (पुराणम्)

पत्रे २ (सम्पूर्णम्)

नं० १०७९-घ

२ पत्रे

लि० संवत् १८२८

श्रीगणे श्रीगणेशायनमः श्री। श्रीलक्ष्मीकांता

श्री। श्रीरामः श्री श्रीगणे श्रीरामः श्री श्रीगणे

२। श्री श्रीराम श्रीगणेशायनमः

श्री श्रीरामः

१००

श्रीगणेशायनमः श्रीगुरु

श्रीराम

श्रीराम

श्रीरामरामरामेति

श्रीगणेशायनमः गोप्यऊचुः जयतितेंधिकंजन्मनाव्रजंश्रयतइन्दिराशश्वदत्रहि दयि
तदृश्यतांदिक्षुतावकास्त्वयिधृतासवस्त्वांविचिन्वते १ शरदुदाशयेसाधुजातसत्सर
सिजोदरश्रीमुषादृशा सुरतनाथतेशुल्कदासिकावरदनिघ्नतोनेहकिंवधः २ वि
षजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् वृषमयात्मजाद्विश्वतोभयादृ
षभतेवयंरक्षितामुहुः ३ नखलुगोपिकानन्दनोभवानखिलदेहिनामंतरात्मदृ
क् ४ विखनसार्थितोविश्वगुप्तयेसखउदेयिवान्सात्वतांकुले ४ विरचिताभयं
वृष्णिधुर्यतेचरणमीयुषांसंसृतेर्भयात् करसरोरुहंकान्तकामदंशिरसिधेहि
नःश्रीकरग्रहम् ५ व्रजजनार्तिहन्वीरयोषितांनिजजनस्मयध्वंसनस्मित भ १

जसखेभवत्किंकरीःस्मनोजलरुहाननंचारुदर्शय ६ प्रणतदेहिनांपापकर्शनंतृ
णचरानुगंश्रीनिकेतनम् फणिफणार्पितंतेपदांबुजंकृणुकुचेषुनःछिंदिहृच्छयम्
७ मधुरयागिरावल्गुवाक्ययाबुधमनोज्ञयापुष्करेक्षण विधिकरीरिमावीरमुह्यतीर
धरसीधुनाप्याययस्वनः ८ तवकथामृतंतप्तजीवनंकविभिरीडितंकल्मषापहम् श्र
वणमंगलंश्रीमदाततंभुविगृणंतिभूरिदाजनाः ९ प्रहसितंप्रियप्रेमवीक्षणंविहरणं
चतेध्यानमंगलम् रहसिसंविदोयाहृदिस्पृशः कुहकनोमनःक्षोभयंतिहि १० चलसि
यद्व्रजाच्चारयन्पशून्नलिनसुंदरंनाथतेपदम् शिलतृणांकुरैःसीदतीतिनःकलिल
तांमनःकांतगच्छति ११ दिनपरिक्षयेनीलकुंतलैर्वनरुहाननंबिभ्रदावृतम् घनरजस्व
लंदर्शयन्मुहुर्मनसिनस्मरंवीरयच्छसि १२ प्रणतकामदंपद्मजार्चितंधरणिमंडनंध्येय
मापदि चरणपंकजंशंतमंचतेरमणनःस्तनेष्वर्पयाधिहन् १३ सुरतवर्द्धनंशोकनाश

नंस्वरितवेणुनासुष्टुचुंबितं इतररागविस्मारणंनृणांवितरवीरनस्तेधरामृतम् १४ अटति
यद्भवानह्निकाननंत्रुटियुगायतेत्वामपश्यताम् कुटिलकुंतलंश्रीमुखंचतेजडउदीक्षतांपक्ष्म
कृद्दृशाम् १५ पतिसुतान्वयभ्रातृबांधवानतिविलंघ्यतेंत्यच्युतागताः गतिविद
स्तवोद्गीतमोहिताःकितवयोषितःकस्त्यजेन्निशि १६ रहसिसंविदंहृच्छयोदयंप्रहसि
ताननंप्रेमवीक्षणम् बृहदुरःश्रियोवीक्ष्यधामतेमुहुरतिस्पृहामुह्यतेमनः १७ व्र
जवनौकसांव्यक्तिरंगतेवृजिनहंत्र्यलंविश्वमंगलम् त्यजमनाक्चनस्त्वत्स्पृहात्मनांस्व
जनहृद्रुजांयन्निषूदनम् १८ यत्तेसुजातचरणांबुरुहंस्तनेषुभीताःशनैःप्रियद
धीमहिकर्कशेषु तेनाटवीमटसितद्व्यथतेनकिंस्वित्कूर्पादिभिर्भ्रमतिधीर्भवदायु षामः
षांनः १९ ॥ इतिश्रीमद्भागवतेमहापुराणेदशमस्कंधेएकत्रिंशोध्यायः ॥
नभःसप्तर्त्तुकनवयमकृताब्दाप्तवत्सरे शुचौशुभेमासिरवौतिथौवयंजनोलिलेखपुस्तकम्